# A-I/1/1254/21

## प्रथमसत्रार्द्धम्

## प्रथमपत्रम्

## साहित्यम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. कविवाङ्निर्मितिः कथं विलक्षणा?
2. क्वापि इति किम् आह?
3. कथं न काव्यत्वहानिः?
4. कस्य प्राधान्यात् न अलङ्कारता?
5. ध्वनिः बुधैः कथं कथितः?
6. अव्यङ्ग्यं कथं स्मृतम्?

**अथवा**

तदर्थाः के?

7. शब्दः कथं त्रिधा?

**अथवा**

विशेषवपुः कीदृशः अर्थः?

8. वाचकस्य किं स्वरूपम्?

**अथवा**

उपाधिः कथं द्विविधः?

9. लक्षणा का?
10. श्रुतार्थापत्तेः कः विषयः?
11. साध्यवसानिका का?
12. प्रस्तावः कः?

**अथवा**

वाच्यसिद्ध्यङ्गं किम्?

13. कुत्र 'रतार्थं प्रविश' इति व्यङ्ग्यम् ?

**अथवा**

प्रच्छन्नकामुकत्वं कुत्र व्यज्यते ?

14. विविक्तोऽयं देशः इति कथं प्रतीतिः ?

15. अर्थस्य व्यञ्जकत्वे कस्य सहकारिता ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. अर्थचित्रम् उदाहरत।

17. अधमकाव्यं निरूपयत।

**अथवा**

उत्तमकाव्यम् उदाहरत।

18. निरूढां लक्षणां निरूपयत।

**अथवा**

शाब्दीं व्यञ्जनां प्रतिपादयत।

19. वाच्यार्थं प्रतिपादयत।

**अथवा**

व्यङ्ग्यार्थं निरूपयत।

20. उपादानलक्षणां सोदाहरणं विशदयत।

**स. एकः निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. मम्मटभट्टस्य आलङ्कारिकत्वं विशदयत।

**अथवा**

काव्यप्रकाशस्य तृतीयोल्लासं संक्षिपत।

**अथवा**

"लक्षणा तेन षड्विधा।" कथम् ?

# A-I/2/1255/21

## प्रथमसत्रार्द्धम्

## द्वितीयपत्रम्

## साहित्यम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे प्रश्ना: समाधेया:।** **(15×2=30)**

1. ध्वनिसिद्धान्तस्य प्रवर्त्तक: क:?
2. आदिकवि: क:?
3. प्रपन्नार्तिच्छद: के?
4. समाम्नातपूर्व: क:?
5. 'गुणवृत्ति' इत्यस्य कोऽर्थ:?
6. अन्ये कं भाक्तमाहु:?
7. शब्दगता: चारुत्वहेतव: के?
8. महाकवीनां वाणीषु किमस्ति?
9. वाच्यप्रतीयमानाख्यौ कस्य भेदौ स्मृतौ?

**अथवा**

बहुधा क: व्याकृत:?

10. 'व्रज ममैवैकस्या' इत्यादि पद्ये व्यङ्ग्यार्थ: कीदृश:?

**अथवा**

त्रय: ध्वनिविरोधिन: के?

11. विभावादिप्रतिपादनमुखेन क: प्रतीयते?

**अथवा**

करुणरसस्य स्थायिभाव: क:?

12. महतां कवीनां सरस्वती किमभिव्यनक्ति?

**अथवा**

शब्दार्थशासनमात्रेणैव किं न वेद्यते?

13. यत्नतः किं प्रत्यभिज्ञेयम् ?

14. ध्वनेः स्वरूपं किमर्थमुच्यते ?

15. वाच्यार्थपूर्विका कस्य वस्तुनः प्रतिपत्तिः ?

**अथवा**

'उपोढरागेण विलोलतारके' इत्यादि पद्ये कस्य प्राधान्यम् ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. 'तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम्' इत्यस्य सप्रसङ्गं व्याख्या कुरुत।

17. तद्व्यतिरिक्तः कोऽयं ध्वनिर्नाम इति यथाग्रन्थं तात्पर्यं विवृणुत।

18. 'वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ' इत्यस्य साशयं व्याख्यानं कुरुत।

**अथवा**

'विभाति लावण्यमिवाङ्गनासु' इत्यस्य भावार्थं प्रतिपादयत।

19. रसध्वनेः व्यञ्जकतां प्रतिपादयत।

**अथवा**

'तदुपादेयता तद्वदर्थे वाच्ये तदादृतः' इत्यस्य सविशदं व्याख्यां कुरुत।

20. 'सुवर्णपुष्पां पृथिवीम्' इत्यादिपद्ये ध्वनिं प्रदर्शयत।

**अथवा**

'शिखरिणि क्व नु नाम' इत्यादिपद्ये ध्वनिं प्रकाशयत।

**स. एकः प्रश्नः समाधेयः।** **(1×20=20)**

21. महत्त्वपुरस्सरं ध्वनिलक्षणं निरूपयत।

**अथवा**

वाच्यप्रतीयमानयोः भेदं सोदाहरणं समुद्भावयत।

**अथवा**

माहात्म्यसहितं रसव्यङ्ग्यत्वं निरूपयत।

# A-I/3/1256/21

## प्रथमसत्रार्द्धम्

## तृतीयपत्रम्

## साहित्यम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्तकं किम्?
2. लोकवृत्तानुकरणं किम्?
3. नाट्यकोविदः कः?
4. भरतेन रङ्गस्य परिमाणं किमुक्तम्?
5. सूर्यदेवेन नाट्यप्रयोगाय किं दत्तम्?
6. नाटयशास्त्रस्य प्रथमाऽध्यायस्य नाम किम्?
7. नियतेन्द्रियबुद्धयः के?

**अथवा**

नाट्यमण्डपविधाननामकः कोऽध्यायः?

8. नाट्यशास्त्रस्य मङ्गलाचरणं कीदृशात्मकं वर्तते?
9. भरतमुनिना सामवेदात् किं गृहीतम्?

**अथवा**

अभिनयः कस्मात् वेदात् अग्रहीत्?

10. नाटयशास्त्रे भरतमुनिः कं स्तौति?

**अथवा**

नाट्यशास्त्रं कीदृशः ग्रन्थोऽस्ति?

11. प्रेक्षागृहं कतिविधम्? के च ते?

**अथवा**

ध्वजमहोत्सवस्य ध्वजस्य नाम किम्?

12. नाट्यशास्त्रस्य रचनाकारः कः ?

**अथवा**

भरतमुनिना रसतत्त्वं कस्मात् वेदात् अग्रहीत् ?

13. नाट्यप्रयोगाय किं प्रदत्तम् ?

14. ऋषयः ब्रह्माणं कति प्रश्नाः अपृच्छन् ?

**अथवा**

त्रेतायुगे. कः मनुः आसीत् ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

15. नाट्यशास्त्रदृष्ट्या प्रेक्षागृहप्रमाणं स्वरूपं च वर्णयत।

16. अप्सराणां नामानि यथाग्रन्थं लिखत।

**अथवा**

विघ्ननाशकस्य जर्जरस्य उपलब्धिं वर्णयत।

17. नाट्याख्यं पञ्चमं वेदं सेतिहासमित्युक्तिं विशदयत।

**अथवा**

रङ्गपीठं ततः कार्यं. . . . .नेपथ्यगृहस्य तु इतिपद्यं प्रपूर्य व्याख्या कार्या।

18. नाट्यशास्त्रस्य मङ्गलपद्यस्य सप्रसङ्गव्याख्या कार्या।

**अथवा**

नाट्याधारशिला स्थापनोत्सवविधानं प्रतिपादयत।

19. नाट्यशास्त्रोक्तं नाटयस्वरूपं पर्यालोचयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

20. नाट्यशास्त्रस्य परिचयो दीयताम्।

**अथवा**

द्वितीयाध्यायस्य विषयवस्तु समालोचयत।

# A-I/4/1257/21

## प्रथमसत्रार्द्धम्

## चतुर्थपत्रम्

## साहित्यम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. नलः कीदृशः नायकः?

   (क) धीरोदात्तः (ख) धीरोद्धतः

   (ग) धीरललितः (घ) धीरप्रशान्तः

2. श्रीहर्षस्य मातुः नाम किम्?

3. भीमनृपात्मजा का?

4. श्रीहर्षस्य समयः कः?

5. नैषधीयचरिते अङ्गीरसः कः?

6. नैषधीयचरितस्य कथावस्तु कुतः गृहीतम्?

7. अस्यां बृहत्त्रय्यां कस्य गणना भवति?

   (क) कुमारसम्भवम् (ख) रघुवंशम्

   (ग) मेघदूतम् (घ) नैषधीयचरितम्

8. खम् एकेन पदा केन अक्रामि?

   **अथवा**

   'समाभुजा' इत्यत्र विग्रहवाक्यं प्रदर्शयत।

9. कामपीडितायाः दमयन्त्याः कृते गीष्मर्तौ रात्रयः कथं प्रतीयन्ते?

10. हरिः कया इच्छया विलासकाननं प्रविवेश?

    **अथवा**

    कति विधानि ईतिभयानि? तेषां नामानि लिखत।

11. चन्द्रवैरिणी का?

12. वियोगभाजः अपि नरपतेः आननं कथमासीत्?

    **अथवा**

    'अपललाप' इत्यत्र कः धातुः कश्च प्रत्ययः?

13. कीदृशीं स्थलपद्मिनीं नलो ददर्श ?

**अथवा**

'यशःसितम्' इत्यत्र कः समासः ?

14. पुष्पाणामाभ्यन्तरे संस्थितं परागं नलः कीदृशम् अमन्यत ?

**अथवा**

'त्रपा' शब्दस्य कोऽर्थः ?

15. वसुधां परित्यज्य अन्तरिक्षं प्राप्ताः खगाः कं निनिन्दुः ?

**ब. सर्वे प्रश्नाः समाधेयाः। (5×6=30)**

16. नलस्य सौन्दर्यवर्णनं क्रियताम्।

17. उपवनसरोवरस्य वर्णनं कुरुत।

**अथवा**

अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम्।
भृषा न चक्रेऽल्पितकल्पपादपः प्रणीय दारिद्र्यदरिद्रतां नृपः॥ –अमुं पद्यं व्याख्यायताम्।

18. नलस्य दमयन्त्यानुरागं वर्णयत।

19. नले भैम्याः स्वप्नगतं दर्शनानुरागं विवेचयत।

**अथवा**

अमुष्य विद्या रसनाऽग्रनर्तकी त्रयीव नीताऽङ्गगुणेन विस्तरम्।
अगाहताऽष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम्॥ –इति पद्यस्यार्थं लिखत।

20. "स्मरः स रत्यामनिरुद्धमेव यत्सृजत्ययं सर्गनिसर्ग ईदृशः" सूक्तिममुं स्पष्टयत।

**अथवा**

पदे पदे सन्ति भटा रणोद्भटा न तेषु हिंसारस एष पूर्य्यते ?।
धिगीदृशं ते नृपतेः कुविक्रमं कृपाश्रये यः कृपणे पतत्त्रिणि॥ –इति पद्यस्य भावं विशदयत।

**स. एकस्य प्रश्नस्य उत्तरं लिखत। (1×20=20)**

21. 'उदिते नैषधे काव्ये क्व माघः क्व च भारविः' इति पर्यालोचयत।

**अथवा**

नैषधीयचरिते वर्णितं भैम्याश्चरितं विवृणुत।

**अथवा**

श्रीहर्षस्य व्यक्तित्त्वं कृतित्वञ्च प्रतिपादयत।